# Prithukritam Vishnu Stotram

# પૃથુકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Prithukritam Vishnu Stotram

File name : pRRithukRRitaMviShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 4/20/23-31||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

# પૃથુકૃતં વિષ્ણુસ્તોત્રમ્

પૃથુરુવાચ ।
વરાન્વિભો ત્વદ્વરદેશ્વરાદ્બુધઃ
કથં વૃણીતે ગુણવિક્રિયાત્મનામ્ ।
યે નારકાણામપિ સન્તિ દેહિનાં
તાનીશ કૈવલ્યપતે વૃણે ન ચ ॥ ૨૩॥

ન કામયે નાથ તદપ્યહં ક્વચિ-
ન્ન યત્ર યુષ્મચ્ચરણામ્બુજાસવઃ ।
મહત્તમાન્તર્હૃદયાન્મુખચ્ચ્યુતો
વિધત્સ્વ કર્ણાયુતમેષ મે વરઃ ॥ ૨૪॥

સ ઉત્તમશ્લોકમહન્મુખચ્ચ્યુતો
ભવત્પદામ્ભોજસુધાકણાનિલઃ ।
સ્મૃતિં પુનર્વિસ્મૃતતત્ત્વવર્ત્મનાં
કુયોગિનાં નો વિતરત્યલં વરૈઃ ॥ ૨૫॥

યશઃ શિવં સુશ્રવ આર્યસઙ્ગમે
યદૃચ્છયા ચોપશ‌ૃણોતિ તે સકૃત્ ।
કથં ગુણજ્ઞો વિરમેદ્વિના પશું
શ્રીર્યત્પ્રવવ્રે ગુણસઙ્ગ્રહેચ્છયા ॥ ૨૬॥

અથાભજે ત્વાખિલપૂરુષોત્તમં
ગુણાલયં પદ્મકરેવ લાલસઃ ।
અપ્યાવયોરેકપતિસ્પૃધોઃ કલિ-
ર્ન સ્યાત્કૃતત્વચ્ચરણૈકતાનયોઃ ॥ ૨૭॥

જગજ્જનન્યાં જગદીશ વૈશસં
સ્યાદેવ યત્કર્મણિ નઃ સમીહિતમ્ ।
કરોષિ ફલ્ગ્વપ્યુરુ દીનવત્સલઃ

સ્વ એવ ધિષ્ણ્યેઽભિરતસ્ય કિં તયા ॥ ૨૮॥

ભજન્ત્યથ ત્વામત એવ સાધવઃ
વ્યુદસ્તમાયાગુણવિભ્રમોદયમ્ ।
ભવત્પદાનુસ્મરણાદૃતે સતાં
નિમિત્તમન્યદ્ભગવન્ ન વિદ્મહે ॥ ૨૯॥

મન્યે ગિરં તે જગતાં વિમોહિનીં
વરં વૃણીષ્વેતિ ભજન્તમાત્થ યત્ ।
વાચા નુ તન્ત્યા યદિ તે જનોઽસિતઃ
કથં પુનઃ કર્મ કરોતિ મોહિતઃ ॥ ૩૦॥

ત્વન્માયયાદ્ધા જન ઈશ ખણ્ડિતો
યદન્યદાશાસ્ત ઋતાત્મનોઽબુધઃ ।
યથા ચરેદ્બાલહિતં પિતા સ્વયં
તથા ત્વમેવાર્હસિ નઃ સમીહિતુમ્ ॥ ૩૧॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે ચતુર્થસ્કન્ધે વિંશાધ્યાયાન્તર્ગતં
પૃથુકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૪/૨૦/૨૩-૩૧॥

bhAgavatapurANa . adhyAya 4/20/23-31..

Proofread by PSA Easwaran

*Prithukritam Vishnu Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*